श्रीस्वप्नविलासामृतम्

विश्वनाथचक्रवर्तिविरचितम्

नीयल्देल्मानिकोनाम्ना सम्पादितम्

प्रिये स्वप्ने दृष्टा सरिदिनसुतेवात्र पुलिनं
यथा वृन्दारण्ये नटनपटवस्तत्र बहवः ।
मृदङ्गाद्यं वाद्यं विविधमिह कश्चिद्द्विजमणिः
स विद्युद्गौराङ्गः क्षिपति जगतीं प्रेमजलधौ ॥ 1

कदाचित्कृष्णेति प्रलपति रुदन्कर्हिचिदसौ
क्व राधे हा हेति स्वसिति पतति प्रोज्झति धृतिम् ।
नटत्युल्लासेन क्वचिदपि गणैः स्वैः प्रणयिभिस्
तृणादिब्रह्मान्तं जगदतितरां रोदयति सः ॥ 2

ततो बुद्धिर्भ्रान्ता मम समजनि प्रेक्ष्य किमहो
भवेत्सोऽयं कान्तः किमयमहमेवास्मि न परः ।
अहं चेत्क्व प्रेयान् मम स किल चेत्क्वाहमिति मे
भ्रमो भूयो भूयानभवदथ निद्रां गतवती ॥ 3

प्रिये दृष्ट्वा तास्ताः कुतुकिनि मया दर्शितचरी
रमेशाद्या मूर्तीर्न खलु भगवती विस्मयमगात् ।
कथं विप्रो विस्मापयितुमशकत् त्वां तव कथं
तथा भ्रान्तिं धत्ते स हि भवति को हन्त किमिदम् ॥ 4

इति प्रोच्य प्रेष्ठां क्षणमथ परामृष्य रमणो
हसन्नाकूतज्ञं व्यनुददथ तं कौस्तुभमणिम् ।
तथा दीप्तं तेने सपदि स यथा दृष्टम् इव तद्-
विलासानां लक्ष्मं स्थिरचरगणैः सर्वमभवत् ॥ 5

विभाव्यथ प्रोचे प्रियतम मया ज्ञातमखिलम्

तवाकूतं यत्त्वं स्मितमतनुथास्तत्वमसि सः ।
स्फुटं यन्नावादीर्यदभिमतिरत्राप्यहमिति
स्फुरन्ती मे तस्मादहमपि स एवेत्यनुमिमे ॥ 6

यदप्यस्माकीनं रतिपदमिदं कौस्तुभ-मणिं
प्रदीप्यात्रैवादीदृशदखिलजीवानपि भवान् ।
स्वशक्त्याविर्भूय स्वमखिलविलासं प्रतिजनं
निगद्य प्रेमाब्धौ पुनरपि तदाधस्यसि जगत् ॥ 7

यदुक्तं गर्गेण व्रजपतिसमक्षं श्रुतिविदा
भवेत्पीतो वर्णः क्वचिदपि तवैतन्न हि मृषा ।
अतः स्वप्नः सत्यो मम च न तदा भ्रान्तिरभवत्
त्वमेवासौ साक्षादिह यदनुभूतोऽसि तद्गतम् ॥ 8

पिबेद्यस्य स्वप्नामृतमिदमहो चित्तमधुपः
स सन्देहस्वप्नात्त्वरितमिह जागर्ति सुमतिः ।
अवाप्तश्चैतन्यं प्रणयजलधौ खेलति यतो
भृशं धत्ते तस्मिन्नतुलकरुणां कुञ्जनृपतिः ॥ 9

श्रीस्वप्नविलासामृताष्टकम् सम्पूर्णम्